# संस्कृत-वार्ता:

दिनाङ्क :-03.06.2024

प्रात: - 06:55

परिणाम:/विधानसभा/अरुणाचलसिक्किम

भारतीय जनतापार्टीति दलेन अरुणाचप्रदेशराज्यस्य नैर्वाचनिकसमराङ्गणं विजित्य सुरक्षितम्। सिक्किमक्रान्तिमोर्चा इत्याख्येन दलेनापि द्वात्रिंशदासनेषु एकत्रिंशत् आसनानि विजित्य सिक्किमप्रदेशे पुनरेकवारं सत्ता संप्राप्ता। उभयो: पूर्वोत्तरीयराज्ययो: विधानसभा-निर्वाचनस्य ह्य: मतगणना आसीत्। उभयत्र हि एकोनविंशे अप्रैलमासे मतदानमासीत्। यत्र अरुणाचलप्रदेशे षष्टि:आसन्दानि आसन्, तत्रैव सिक्किमे द्वात्रिंशत् आसन्दानि आसन्। अरुणाचलप्रदेशे च भाजपेति दलेन दश आसनेषु निर्विरोधतया निर्वाचनपुरस्सरम् आहत्य षड्चत्वारिंशत्स्थानानि सन्ति सुरक्षितानि।

प्रधानमन्त्री-उपवेशनम्

प्रधानमन्त्री नरेन्द्रमोदी ह्य: अत्यधिक-उष्मतया सह चक्रवातादि- सप्तविषयान् अवलम्ब्य सप्तो उपवेशनानि आचरितानि। प्रथमोवेशने पूर्वोत्तरराज्येषु आगतस्य चक्रवातस्य स्थिते: समीक्षा अभवत्। अन्ये एकस्मिनुपवेशने राष्ट्रे उत्कट-घर्मस्य समीक्षा जाता। श्रीमोदी विश्वपर्यावरणदिवस्य व्यापकतया समायोजनमभिक्ष्य अपि एकस्य समीक्षोपवेशनस्य आयोजनं कृतवान्। प्रधानमन्त्री संघट्यमानस्य नूतनप्रशासनस्य शतदिवसीयकार्य-योजनामभिलक्ष्यापि उपवेशनमेकं समायोजितम्।

केजरीवाल:

दिल्ल्याः राउजएवेन्यून्यायालयेन ह्यः मुख्यमन्त्री अरविन्द केजरीवाल: कथितमद्यनीते: धनशोधनप्रवंचना सन्दर्भे जूनमासस्य पंच दिनाङ्कपर्यन्तं न्यायिकनिग्रहे प्रेषितः। न्यायालयः केजरीवालं प्रति प्रवर्तननिदेशालयस्य आवेदनस्य श्रवणं कुर्वन् आसीत्। असौ अल्पकालिक मुक्तियाचिकायां आसीत् अनेन कारणेन आवेदनं लम्बितम् आसीत्। ह्यः तस्य आत्मसमर्पणानन्तरं राउस् एवेन्यू न्यायालयेन जूनमासस्य पञ्च दिनाङ्कपर्यन्तं न्यायिकनिग्रहे असौ प्रेषितः। आत्मसमर्पणात् पूर्वं केजरीवाल: दलनेतृभिः कार्यकर्तृभिः सह संवादं कृतवान्, जनान् सम्बोधितवान् च । केजरीवाल: कथिते दिल्ल्याः मद्य नीति प्रवंचना प्रकरणे मार्चमासस्य एकविंशतिः दिनाङ्के प्रवर्तन निदेशालयेन गृहीतः आसीत्। सः मई मसास्य दश दिनाङ्के अल्पावधिकमुक्तिं प्राप्तवान् आसीत्, सर्वोच्चन्यायालयेन ह्यः तिहाड़कारावासे आत्मसमर्पणं कर्तुं पृष्टः आसीत्।

भारतीयमुष्टामुष्टी

मुष्टामुष्टी क्रीडायां भारतीयमुष्टामुष्टी क्रीडकौ जैस्मीन लम्बोरिया, अमितपङ्गलः च ह्यः उत्कृष्ट प्रदर्शनस्य अनन्तरं प्रतिष्ठित-पेरिस् ओलम्पिकक्रीडायां प्रवेशं कृतवन्तौ। पुरुषाणां एक पञ्चाशत् किलोग्राममितस्य प्रागुपान्त्यचक्रीय -क्रीडायां अमितः चीनस्य लियू चुआङ्ग् इत्यमुं पञ्च-शून्यं- इत्यंकांतरालेन पराजित्य विजयं प्राप्तवान् । तत्रैव जैस्मिन्, महिलानां सप्त पञ्चाशत् किलोग्राममिते वर्गे मालीदेशस्य मरीन कैमारा इत्येतां पराजीवती, यत्र पञ्च-शून्यं प्रागुपान्त्यचक्रीय -विजयं सुलभं कृतवती।

ताइवान एथलेटिक्स

चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य ताइवान एथलेटिक्स ओपन इत्यास्यं क्रीडायां भारतीयदलेन त्रीणि स्वर्णपदकानि, त्रीणि रजतपदकानि, एकं कांस्यपदकं च समेत्य सप्तपदकानि प्राप्य उल्लेखनीयपदकप्राप्त्यभियानस्य समापनं कृतम्। महिलानां दीर्घकुर्दन क्रीडायां नयना जेम्स् इत्येषा स्वर्णपदकं प्राप्तवती, पुरुषाणां अष्टशतं मीटरमितस्पर्धायां भारतस्य अंकेशचौधरी स्वर्णपदकं प्राप्तवान्, सोमनाथचौहानः रजतपदकं प्राप्तवान्। पुरुषाणां पोलवॉल्ट् स्पर्धायां देवमीना रजतपदकं प्राप्तवान् । पुरुषस्य कुंतक- प्रक्षेपणे डीपी मनुः एकाशीति दशमलव अष्ट पञ्चाशत् मीटरमित पर्यन्तं सर्वोत्तमप्रयत्नेन स्वर्णपदकं प्राप्तवान् । महिलानां शत मीटरमित बाधा धावनस्पर्धायां नित्यरामराजः त्रयोदश दशमलव त्रयोविंशतिः क्षण समयस्यांतरे रजतपदकं प्राप्तवान् । विस्मया वी के इत्येषा महिलानां चतुःशत् मीटर् मितस्य धावने कांस्यपदकं प्राप्तवती ।

क्रिकेट

विंशतिं प्रति विंशतिः पुरूष वर्गस्य विश्वचषकक्रिकेटस्पर्धायां गतरात्रौ गुयाना इति क्षेत्रस्थे प्रोविडेंस क्रीडाङ्गणे प्रतिस्पर्धायां वेस्टइंडीज दलेन पापुआन्यू गिनी देशीयं दलं पंचस्तोभै पराजितम्।